# संस्कृतवार्ताः

**दिनाङ्क :- 29.05.2025**

**प्रात: - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री सिकिम्म-यात्रा**

प्रधानमन्त्री नरेन्द्र-मोदी अद्य सिकिम्म @50 इत्यस्मिन् कार्यक्रमे प्रतिभागं करिष्यति। **प्रगति: उद्देश्येन सह मिलति प्रकृतिश्च विकासं पोषयति** इति कार्यक्रम: गङ्गटोक नगरे आयोज्यते। अत्रावसरे प्रधानमन्त्री विविध-परियोजनानाम् आधारशिला-स्थापनम् उद्घाटनं च विधाय जनान् सम्बोधयिष्यति।

**प्रधानमन्त्री बिहार-बङ्गाल:**

प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् अद्य बिहाराय पटनावासिभ्य: च विशेषावसरो वर्तते। एकस्मिन् सामाजिक-सञ्चार-पटले प्रधानमन्त्री अवोचत् यत् पटना-नगरेण अद्य नूतनं यात्रि-स्थासनं प्राप्यते। यत्र जनानाम् आधिक्यम् अपि सारल्येन स्थातुं शक्नोति। अमुनोक्तं यत् बिहार-वासिन: बहुभ्यो वर्षेभ्य: अस्य प्रतीक्षायां वर्तन्ते। प्रधानमन्त्रिणा अत्रावसरे बिहता विमान-पत्तनस्य आधारशिला अपि स्थापयिष्यते। प्रधानमन्त्रिणा उक्तं यत् असौ अद्य मध्याह्ने पश्चिम-बङ्गालस्य अलीपुरद्वार-क्षेत्रे जनान् सम्बोधयिष्यति।

**राष्ट्रपति: साहित्य-सम्मेलनम्**

राष्ट्रपति: द्रौपदी मुर्मु: अद्य राष्ट्रपति-भवनस्य संस्कृति-केन्द्रे साहित्यिक-सम्मेलनम् उद्घाटयिष्यति। अस्मिन् द्वि-दिवसीये सम्मेलने कविगोष्ठि: वैश्विक-परिदृश्ये भारतीय-साहित्यं च प्रभृति: सत्राणि आयोजयिष्यन्ते। राष्ट्रपति-भवनेन साहित्य- अकादम्या च संयुक्त-रूपेण इदं सम्मेलन् आयोज्यते।

**मन्त्रिमण्डलनिर्णय:**

आर्थिक-प्रकरणानां मन्त्रिमण्डल-समित्या चतुर्दश-शारदीय-शस्यानां न्यूनतम-समर्थनमूल्ये एम.एस.पी.इत्यत्र वृद्धि: कृतास्ति। गतसायं वार्ताहरान् सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णव: अवोचत् यत् धान्यानां लाभप्रद-मूल्यं सुनेश्चेतुम् इयं वृद्धि: कृता।

सममेव मन्त्रिमण्डलेन वर्तमानेन प्रतिशतं सार्धैक-मितेन कुशीदानुदानेन सहैव ऐषम: संशोधित-कुशीदानुदानं प्रवर्तयितुम् अपि निर्णीतम्। मन्त्रिमण्डलेन महाराष्ट्रे मध्यप्रदेशे च रेल-विभागास्य द्वे बहुपथ-परियोजने अपि अभिस्वीकृते।

**जयशङ्कर: अफ्रिका दिवस:**

विदेशमन्त्री डा. एस् जयशङ्कर: गतिदने नवदिल्लयाम् ऐषम: अफ्रिका दिवस-समारोहे प्रतिभागम् अकरोत्। एकस्मिन् सामाजिक-सञ्चारपटले डा.जयशङ्कर: अवोचत् यत् भारतेन अफ्रिकया च परस्परं मित्रता ऐक्यं च सन्धत्ते। अमुनोक्तं यत् भारतम् अफ्रिकाया: विकासाय सर्वतोदृशा प्रयतते। विदेशमन्त्रिणा व्यापारे रक्षायां परस्परविकासे च द्वयो: देशयोः साहमत्यं प्रकटितम्।

**ऋतु सन्चेतना**

भारतीय ऋतु-विज्ञान-विभागेन अद्य असम, मेघालय, तटीय-दक्षिण-कर्णाटक- केरल-माहे-नगालैण्ड-मणिपुर-मिजोरम-त्रिपुरा-तमिलनाडु-पुद्दुचेरी-कराईकला इत्येतेषु तीव्र वृष्टे: अनुमानं प्रकटितम्। सममेव ऋतु-विज्ञान-विभागनेन अरुणाचल-प्रदेश-ओडिशा तेलंगाना पश्चिम-बंगाल-सिकिम्म-राज्येषु प्रबल वर्षा सञ्चेतिता। अथ च अन्येषु अपि कतिपय-राज्येषु इयमेव स्थिति: संभविष्यतीति सम्भाव्यते।

**एशियन् चैम्पियनशिप्**

भारतीय-धावकै: दक्षिण-कोरियायाम् एशियन् एथलेटिक-चैम्पियन्शिप् इति स्पर्धा मालिकायां 4x400 मिक्स रिले इति श्रेण्यां स्वर्णपदकं विजितम् । भारतीयदले रूपल-चौधरी, सन्तोष-कुमार: विशाल टी.के सुभा वैंकटशन् च सम्मिलिता: सन्ति। निर्णायक-स्पर्धायां भारतेन चीन-श्रीलङ्का दले पराजिते।

**।। इति वार्ता:।।**